National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(62): 267-272
© 2025 NJHSR
www.sanskritarticle.com

**प्रो. प्रभाकरप्रसादः**
आचार्यः, सर्वदर्शनविभागः,
श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः,
नव देहली- १६

**Correspondence:**
**प्रो. प्रभाकरप्रसादः**
आचार्यः, सर्वदर्शनविभागः,
श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः,
नव देहली- १६

# अपोहवादनिराकरणम्

**प्रो. प्रभाकरप्रसादः**

बौद्धा अपोहवादमेवं समर्थयन्ति शब्दार्थयोः कार्यस्वभावलक्षणहेतुनिबन्धनोऽविनाभावो न सङ्गच्छत इति, परन्तु अनुपलब्धिलक्षणहेतुनिबन्धनोऽविनाभावः कुतो न सङ्गच्छते।

यतो हि अपोह एव शब्दस्य विषयः। तथा हि गोत्वादिसर्वधर्माणामवाच्यत्व-सिद्धये अपोह एव शब्दलिङ्गयोर्विषय इति[1] स्वीक्रियते। इह खलु वृक्षो धवो, वृक्षः खदिरो, वृक्षः शिंशपेत्येवं प्रयोगे वृक्षव्यक्तित्वेनेष्टधवादिषु सर्वेष्ववृक्षार्थाद धवादेर्व्यावृत्यात्मकं रूपमन्यापोहलक्षणमस्तीति समेषाम-विवादम्। तथैव वृक्षेऽशिंशपापोहात्मकं रूपं शिशपाशब्देनोच्यते इति समेषां संमतम्। अन्यथा शिंशपेति श्रवणसमनन्तरमशिंशपायामपि प्रवृत्तिः स्यात्। परन्तु सदा तत्तच्छब्दश्रवणात् तदितरव्यावृत्तिपूर्वकं तत्तच्छब्दार्थे एव प्रवृत्तिः जनानां दृश्यते । तथा चान्यापोहस्य शब्दविषयत्वमवश्यं स्वीकार्यम् । द्वेधा हि प्रक्रिया बौद्धानामत्र दृश्यते-अन्यापोहस्य गम्यत्वं गमकत्वं चेत्येका, यथा हि-

> **तस्मादपोहविषयमिति लिङ्गं प्रकीर्तितम् ।**
> **अन्यथा धर्मिणः सिद्धावसिद्धं किमतः परम् ।।**

अन्यापोहविशिष्टस्य गम्यत्वं गमकत्वं चेत्यन्या । उक्तं हि –

> **तद्यवच्छेदविषयं सिद्धं तद्वत्ततो परम् । इति ।।**
> **तथापि चान्या व्यावृत्तिरन्यो व्यावृत्त इत्यपि ।**
> **शब्दाश्च विषयाश्चैव सङ्केतमनुरुन्धते ।॥ इति च ॥[2]**

उभयथा शब्दविषयत्वमपोहे स्वीक्रियते । एवं स्थितौ यदि गृहे मार्जारप्रचारो नास्ति सन्ति तर्हि मूषकाः सुखिनः इति द्वयोरेकतराभावेऽपि अनुपलब्धेर्लिङ्गत्व-दर्शनात् शब्दस्य भावरूपत्वेऽपि तदर्थस्याभाव-रूपत्वादत्रानुपलब्धेः लिङ्गत्त्वं सङ्गच्छत इति अर्थेनानुबन्धवतो लिङ्गाच्छब्दादर्थाधिगम इति शब्दो न मानान्तरमिति चेत् ।

उच्यते- नापोहः शब्दस्य विषयः किन्तु जातिरेव शब्दार्थः अपोहस्य शब्दार्थत्वे परस्परश्रयदोषः स्यात्। तथाहि अगोत्वव्यावृत्तिरेव गोत्वमिति भवतामभिमतम्। तच्च गवामनुगतैकगोत्वनिरूपणाधीनं तदितरेषामगोत्व-निरूपणम्, अगोत्वनिरूपणाधीनं च गोत्वनिरूपणमिति परस्पराश्रयदोषः प्राप्तः। अगोव्यावृत्तिरेव गोत्वमिति चेत् स एव दोषः गोशब्देनाप्यगामनभिधाय तन्निवृत्तिरूपमपोहमभिधा-तुमशक्नुवता अवश्यमगौरभिधातव्यः। स च गोनिषेधात्मा, नानभिधाय गामभिधातुं शक्यत इति सुस्पष्टः परस्पराश्रयः अगोसिद्ध्यर्थं यदि विधिरूपो गौरङ्गीक्रियते तदा वृथापोहकल्पना स्यात्। तदुक्तं भट्टाचार्यैः-

> **सिद्धश्चागोरपोहोतागोनिषेधात्मकश्च सः ।**
> **तत्र गौरेव वक्तव्यो नत्रा यः प्रतिषिध्यते ॥[3]**
> **सिद्धोद्गौरपोह्यार्थं वृथापोहप्रकल्पना ।। इति ॥**

**अपोह एव शब्दार्थः-** ननु- यदि गोत्वं नाम सामान्यं वस्तु सच्चेद् भवेदेवं परस्पराश्रयदोषः। परन्तु सामान्यं न वस्तुसत् केवलविकल्पमात्रम्।

यद्यपि सामान्यप्रतिभासस्य प्रत्यक्षतो बाधो न भवति तथापि यौक्तिको बाधः सम्भवत्येव। तथाहि - अस्ति तावन् नीलो घटः पीतो घट इत्याद्याकारको विशिष्टव्यवहारोऽबाधितः सर्वानुभव-सिद्धः। तत्र किं नीलो घटः इति सामान्यविशेषो पृथग् द्वे वस्तुनी प्रतिभासेत इति स्वीक्रियते? उत एकं द्वयात्मकं वस्तु भासत इति स्वीक्रियते ? आहो स्विदेकमेव वस्तु निर्भासत इत्यङ्गीक्रियते ? इति विचारणीयम्। न तावत् प्रथमः पक्षः स्वीकार्यः सामान्यं विशेषश्च द्वे वस्तुनी चेत्पटवभेदेनोपलम्भः स्यात्, नीलो घटः इति सामानाधिकरण्यप्रयोगानुपपत्तेश्च। न हि घटो पट इति वदत्यन्तभेदे सामानाधिकरण्यप्रयोगो दृश्यते। नापि द्वितीयः पक्षः क्षोदक्षम; एकत्रैकत्वद्वित्वयोः समावेशानुपपत्तेः नीलाकारस्य पीतघटेऽप्यनु-वृत्तिप्रसङ्गाच्च, तथा हि नीलघटयोरभेदे घटत्वस्य पीतघटे विद्यमानत्वात्तदभिन्नस्य नीलाकारस्यापि तत्रा-नुवृत्तिः कुतो न भवति। भेदस्यापि विद्यमानत्वान्नानुवृत्तिरिति चेद्, अभेदान्त्री लघट्योः पीते घटेऽनुवृत्तिः भेदान्न नीलाकारस्य अनुवृत्तिरिति एकस्यैव नीलाकारस्यानुवृत्तिरननुवृत्तिश्चेति वैरूप्यप्रसङ्गः। नापि तृतीयो विकल्पोऽङ्गीकार्य; सामान्यं न न सिद्धयेत् ।[4] नीलघटः पीतो घट इत्यादि स्थलेष्वपि स्वलक्षणमसा-धारणरूपमात्रं प्रतिभासते चेत् तदतिरिक्तस्य सामान्यस्य ग्राहकप्रमाणाभावान्न सिद्धिः । तथा च सामान्यप्रतिभासस्य युक्तिबाध्यत्वात् व्यावृत्तासु नीलघटादिव्यक्तिषु परिकल्पितं घटत्वादिसामान्यमिति निश्चीयते । तदुक्तं भिक्षुणा-

**न जातिशब्दो भेदानामानन्त्यव्यभिचारतः।**
**वाचको योगजात्योर्वा भेदार्थैरपृथक् श्रुतैः।। इति**

किं च- जातिवादिनां जातिस्वरूपनिरूपणं दुर्घटमेव । तथा हि- किं सामान्यं मूर्तपदार्थः? उतामूर्तपदार्थः? नाद्यः अक्रियावत्वात्, अनङ्गीकाराच्च। न द्वितीयः अमूर्त सामान्यमिति चेत्, तत् किं सर्वगतमाकाशादिवत्? किं वा स्वाश्रयमात्रगतम्? यदि सर्वगतम् तदैकत्राभिव्यक्तं सर्वत्राभिव्यक्तमेवाभिन्नात्मकत्वात् न क्वचिदनुप-लम्भः स्यात्, वस्तुसंकरप्रसङ्गाश्च सर्वपिण्डेषु सर्वसामान्य-सद्भावात्। कश्चिदेव पिण्डः कस्यचिदेव व्यञ्जकः ततो न सङ्करदोषप्रसङ्ग इति चेत्, न नियमहेत्वभावात्। किञ्च-

**व्यञ्जकाप्रतिपत्तौ हि न व्यङ्ग्यं सम्प्रतीयते।**
**विपर्ययः पुनः कस्मादिष्टः सामान्यतद्वतोः।।**

सामान्यमेव व्यञ्जकमिति अश्वादावपि गोत्वस्य विद्यमानत्वात् गोशब्दादश्वेपि प्रवृत्तिप्रसङ्गः। अथ द्वितीयः पक्षः स्वाश्रयमात्र-गतम् इति चेत् तदा प्रत्यग्रजायमानखण्डमुण्डादिपिण्डेषु पिण्डान्तर-स्थितायाः जातैः सम्बन्धाभावप्रसङ्गः। न हि सामान्यं पिण्डान्तरा-दुत्प्लुत्यान्यत्रानुप्रविशति निष्क्रियत्वात् पूर्वपिण्डे तद्व्यवहाराभाव-प्रसङ्गाच्च। न चांशाभ्यामुभयत्र वृत्ति; अनंशात्वात्। अथ स्वसामग्रीवशादुपजायमानः पिण्डस्तत्सामान्यमालिङ्गित एवोत्प-द्यत इति चेत्, न; पिण्डोत्पत्तेः प्राक् तत्र तस्याभावात् भावे च सर्वसर्वगतत्वापत्ति; तथा च पूर्वपक्षोक्तदोषप्रसक्तिर्दुर्वारः। तदुक्तं प्रमाणवार्तिके-

**अन्यत्र वर्तमानस्य ततोऽन्यस्थानजन्मनि।**
**स्वस्थानादचलतोऽन्यत्र वृत्तिरयुक्तिमत्।।**
**यत्रासौ वर्तते भावस्तेन सम्बध्यतेऽपि न।**
**तद्देशिनं च व्याप्नोति किमप्येतन्महाद्भुतम्।।**
**न याति न च तत्रासीदस्ति पश्चान्न चांशवत् ।**
**जहाति पूर्वं नाधारमहो व्यसनसन्ततिः।। इति।।[5]**

सर्वपिण्डप्रलये च घटत्वादिजातेरुच्छेदप्रसङ्गः । सम्बन्धविगमेऽपि तस्याः स्वरूपेणावस्थानमिति चेत्, नः आधारविगमेऽप्याधेया-वस्थाने रूपादेरपि तथावरि थतेर्नित्यत्वप्रसङ्गः। तदेवं मूर्तमिति वामूर्तमिति वा सामान्यस्वरूपनिरूपणं दुर्घटमेव। किं च सामान्यमनित्यं वा नित्यं वा? नाद्य; अनङ्गीकारात्। तत्कारणस्य तन्नाशकस्य चाशक्यनिरूपणत्वात्। अथ नित्यं सामान्यम्, तर्हि महाप्रलये सर्वघटादिनाशे तत् क्वावतिष्ठेत? व्यापकं चेत् तदा सर्वसर्वगतमिति वक्तव्यन्तथा च तत्पक्षोक्तदोषा दुर्निवाराः । सामान्यं प्रलये क्वापि न तिष्ठति चेत्, नित्यं महाप्रलये नास्तीत्यतीवचित्रम्।

किं च यदि व्यक्तयः स्वभावेनैव समानाः कि तत्रापरेण सामान्येन? वैयर्थ्यात्। अथासमानाः कथं तासु सामान्यम्, समानानांभावो हि सामान्यमुच्यते । अथ नियतास्वेवासमानव्यक्तिषु सामान्यं समवैति न सर्वास्वित्येवं स्वभावं सामान्यमिति चेत्, न एवं सति समानप्रत्यय एव नियतो भविष्यति किमन्तर्गडूयमानेन सामान्येन कृत्यम्।

किं च सामान्यादौ सामान्यमस्ति वा न वा? अस्ति चेदन-वस्थाऽनङ्गीकाराच्च। नास्ति चेत्, कथं पुनर्निस्सामान्ये सामान्यादावन्तेऽपि तद्वाचकसङ्केतः सम्भवी? संव्यवहारानुवृत्तिः सामान्यादौ सत्ताध्यारोपनिबन्धनैवेति चेत् तथा सति घटपटा-दिष्वपि अध्यारोपनिबन्धनैवानुगतप्रतीतिर्भवत्विति सामान्यकथैव सर्वत्रोत्सृज्येत।

एवमियं वस्तु सती जातिरिति प्रक्रिया सर्वप्रकारेण यथायथोप-पत्तिमत्त्वाय परीक्ष्यते तथा तथा सिकताकूपवद्विदीर्यत एव । अतः सामान्यं न वस्तुसत् किन्तु काल्पनिकमिति सिद्धम् । ननु शब्दार्थः व्यक्तिरेव भवतु न जातिरिति चेत्, न व्यक्तीनामानन्त्यात् सम्बन्धग्रहणानुपपत्तेरयुक्तम्। अपि च घटादिशब्दस्य विधिविष-यत्वे नास्त्यस्तीति पदाभ्यां सामानाधिकरण्यं न स्यात्, नास्तीति पदेन विधिविरोधादस्तीति पदस्य च वैयर्थ्यात् । तथा च न विधिः शब्दार्थः किन्तु अन्यापोह एव शब्दविषय इति सुष्टु।

**अपोहवादः निर्दुष्टः-**

जातेश्च काल्पनिकत्वादेवापोहवादिनां नान्योन्याश्रयः। अपोहस्वरूप-निरूपणं च सुघटम्। तथा हि सरणिद्वयमत्र दृश्यते एकाऽसत्ख्यातिवा-दगर्भा सरणिः। अपरा चात्मख्यातिगर्भा सरणिरिति।

यद्यपि विधिरूपेण गौरिति अश्व इति शब्दात्प्रवृत्तिस्तथापि नीतिविदोऽन्यापोहविषयानेव तान् व्यवस्थापयन्ति, शब्दादिभि-र्बोध्यो नान्तरो न बाह्योऽन्य एव कश्चिदारोपित आकारोव्या-वृत्तिछायायोगादपोहशब्दार्थ उच्यते इतीयमसत्ख्यातिवादगर्भा सरणिः। ननु कोऽयमपूर्वः नान्तर्बहिर्विद्यते अपोहः शब्दविषयश्चेति प्रत्यपादि बौद्धैरिति चेत्। न; विकल्पमात्रस्वरूपस्यापोहस्य

नियोगपर्यनुयोगानर्हत्वात्। वस्तुनि हि दोषारोप; न तु कल्पित इत्यदोषः। पूर्वपक्षनिरूपणे तदुक्तं भट्टजयन्तैः –

**ननु यद्विद्यते नान्तर्न बहिः परमार्थतः।**
**न तु विद्यत एवेति कथं शब्दार्थ उच्यते॥**
**पारमार्थिकशब्दार्थसमर्थनपिपासिताः।**
**नेहागताः स्मो येनैवमनुयुज्येम हि त्वया॥ इति।।**[6]

विकल्पप्रतिबिम्बकं ज्ञानाकारमात्रमेव तदबाह्यमपि विचित्रवासना-भेदोपाहितरूपभेदं बाह्यवदवभासमानं लोकयात्रां बिभर्ति, व्यावृत्तिछायायोगाच्च तदपोह इति व्यवह्रियते, सेयमात्मख्यातिगर्भा सरणिः। ननूभयथापि अपोहविषयकत्वाच्छब्दस्य अपोहस्य च मिथ्यात्वाद्वस्तुविषयत्वाभावे कथं वस्तुनि व्यवहाराः प्रवर्तन्ते ? यतो हि दृष्टेऽपि क्वचिद्वस्तुनि तृणादौ प्रवृत्त्यभावाद् अर्थित्वं प्रवृत्तेः कारणम्, मिथ्यार्थे चार्थित्वमनुपपन्नमिति बौद्धानामपोहवादिनां शब्दात् बहिरर्थे प्रवृत्तिः कथं सङ्गच्छत इति चेत्। उच्यते-प्रवृत्तिस्तावद् दृश्यविकल्पयोरेकीकरणनिबन्धना, दृश्यदर्शना-नन्तरमुत्पन्ने विकल्पे विकल्प्य तेन प्रतिपद्यते प्रमाता, दर्शनान्तर्यविप्रलब्धस्तु दृश्यमेव गृहीतं मन्यते, तदभिमानेन च प्रवर्तते। इदं तदेकीकरणमाहुः दृश्यविकल्पयोर्भेदो यन्न गृह्यते । न पुन-र्भिन्नयोरभेदाध्यवसाय एकीकरणमिष्यते, दृश्याद् विभिन्नस्य विकल्पस्य शुक्तेरिव रजतस्य निर्देष्टुमशक्यत्वादभेदाध्यवसाये च तदेपक्षितत्वात्। प्राप्तिरपि अर्थक्रियाकारिणो दृश्यस्यैव वस्तुनः। तथा हि मूलवर्तिनमुपलभ्य प्रवर्तमानस्तमाप्नोति अपवरकनिहित-मणिप्रसृतायां कुञ्चिकाविवरनिर्गतायामिव प्रभायां मणिबुद्ध्या प्रवर्तमानः यत्र तु मूलेऽप्यर्थो नास्ति तत्र व्यामोहात् प्रवर्तमानो विप्रलभ्यते दीपप्रभायान्तथैव मणिबुद्ध्या प्रवर्तमानः एवमेव बाह्यवस्तुसंस्पर्शशून्येष्वपि विकल्पेषु समुल्लसितेषु बाह्योऽर्थों मया प्रतिपन्नः; तत्र चाहं प्रवृत्तः स च मया प्राप्त इत्यभिमानो भवति लौकिकानाम्, न त्वयमर्थाध्यवसायमूलः। तदुक्तम् - **"यथाध्यवसायमतत्त्वाद्यथातत्त्वं चानध्यवसायात्"**[7] इति।

**तदेवमेष लोकस्य व्यवहारोऽवकल्पते।**
**विवेकिनापि वोढव्या लोकयात्राथ लोकवत्।।**[8]
**तस्माद्विकल्पप्रतिबिम्बनस्य शब्दार्थतामाहुरपोहनाम्नः।**
**प्रतीतिमार्गस्त्वविविच्यमानो जनस्य जातिभ्रममातनोति।।**
**यावांश्च कस्मिन्नियमप्रकारः प्रवर्तते जातिषु वृत्यवृत्योः।**
**तावानपोहेष्वपि तुल्य एव भवत्यवस्तुत्वकृतस्तु भेदः॥**[9]

एवं च अपोहवादे दोषाभावाद् वस्तुसतः सामान्यस्य निरूपयितुमशक्यत्वादपोह एव शब्दार्थ इति अपोहरूपार्थेन सम्बन्धवतो लिङ्गाच्छब्दादर्थाधिगम इति न प्रमाणान्तरं शब्दः इति पुनः पूर्वपक्षे प्राप्ते

**शब्दस्य प्रमाणान्तरतासमर्थनम्-**

**अपोहवादनिराकरणम्-**

अत्र समाधिरभिधीयते- नापोहः शब्दार्थः किन्तु जातिरेव शब्दार्थः इति। अपोहवादनिराकरणं श्लोकवार्तिके, न्यायवार्तिकतात्पर्यटीकायां, न्यायमंजर्यां तथा न्यायचन्द्रिकायान्तथा बहुष्वन्येषु ग्रन्थेषु कृतम्। पूर्वमत्र टीकाकाराणाम् (श्रीमदानन्दबोधानाम्) अपोहवादनिराक-रणसरणिः प्रदर्श्यते । तथाहि-सामान्यविशेषौ न द्वे वस्तुनी, नाप्येकं द्वयात्मकम्, नापि नीलो घट इत्येकवस्तुनिर्भासोऽयमिति यद् बौद्धैर्निरूपणासहत्वं प्रादर्शि तदलङ्कार एवास्माकम्। परन्तु एतन्निरूपणासहत्वाद् व्यावृत्तास्वेव व्यक्तिष्वनुवृत्तं सामान्यं कल्पितमिति यत्तैः प्रत्यपादि तदतिसाहसमात्रम्। किमेतन्निरूप-णासहत्वहेतुना व्यावृत्तास्वनुवृत्तं कल्पितमिति, अनुवृत्ते व्यावृत्ताः कल्पिता इति वा निश्चयः स्यात्? न, विनिगमनाविरहेणोभयथापि वक्तुं शक्यते इत्येव निरूपणासहत्वहेतुः साधयति। लाघवादनुवृत्त एव व्यावृत्ताः कल्पिता इति प्रमाणविदः प्रमाणयन्ति। अनुमानमत्र मानम् विवादास्पदीभूता व्यक्तयः स्वानुस्यूतैकवस्तुनि परिकल्पिता; प्रत्येकमेकस्वभावानुविद्धत्वात् यदित्थं तत्तथा यथा तरङ्ग-भेदनिबन्धनाश्चन्द्रभेदाः तथा चैता उक्तसाधनास्तस्मादुक्तसाध्या इति। ब्रह्मसिद्धिकारैश्चोक्तम्-

**प्रत्येकमनुविद्धत्वादभेदेन मृषा भवेत्।**
**भेदे तथा तरङ्गाणां भेदाभेदः कलावतः ॥ इति ।।**[10]

दर्शितं चानुमानन्तत्रेत्थम् "घटादिकं सद्रूपे कल्पितम्, प्रत्येकं तदनुविद्धत्वेन प्रतीयमानत्वात्, प्रत्येकं चन्द्रानुविद्धजलतरङ्ग-चन्द्रवद्" इति । अत्रोभयत्र दृष्टान्ते एक एव चन्द्रः सत्यः चन्द्रभेदास्तरङ्गग भेदोपाधिकाः कल्पिता तथा दाष्टन्ते व्यक्तिभेदाः कल्पिताः एकैव जातिः सत्येत्यर्थः । तथा च सामान्ये एव व्यावृत्ताः व्यक्तयः कल्पिता इति सिद्धम्।

समान्यं च नो वेदान्तनये एकं "सद्" एव। तदेव सर्वशब्दानां प्रवृत्तिनिमित्तम्।

तदतिरिक्तगोत्वघटत्वपटत्वादिसामान्यान्यभ्युपगमात्। अत एव खण्डो गौर्मुण्डो गौरिति प्रत्येकं गोत्वानुविद्धस्यापि गोत्वे परिकल्पितत्वाभावाद् व्यभिचारो न। घटः सन्, पटः सन्, गौः सन्, इति प्रतीयमानं सद्रूपसामान्यमेव गोव्यक्तिष्वनुगतं गोत्वमिति व्यपदिश्यते। तत्र सद्रूपे सामान्ये खण्डो गौ; मुण्डो गौरित्यादिगोव्यक्तीनां परिकल्पितत्वान्न व्यभिचारः।

तदुक्तं भर्तृहरिणा-

**सत्यासत्यौ तु यौ भावौ प्रतिभावं व्यवस्थितौ।**
**सत्यं यत्तत्र सा जातिरसत्या व्यक्तयः स्मृताः।।**
**सम्बन्धिभेदात् सत्तैव विद्यमाना गवादिषु।**
**जातिरित्युच्यते तस्यां सर्वे शब्दाः व्यवस्थिताः।।**
**सा नित्या सा महानात्मा तामाहुस्त्वतलादयः।। इति ।।**

अद्वैतसिद्धावपि सत्सामान्यातिरिक्तगोत्वादिसामान्यानभ्युपगमात्, गोत्वाद्यभ्युपगमेऽपि गोत्वादिव्यञ्जकतावच्छेदकसामान्यानभ्युपगमाद् व्यक्ति-विशेषाणामेवाननुगतानां सास्नादिमत्वाद्युपाध्यनुगतानां वा तद्व्यञ्जकत्ववद् व्यक्तिविशेषविशिष्टत्वेन सह-सामान्यस्यैव तत्तद्व्य-वहारजनकत्वोपपत्तेरिति निरटङ्किः। मण्डनमिश्रः ब्रह्मसिद्धौ निरणायि-

**एकस्यैवास्तु महिमा यन्नानेव चकासति ।**

**लाघवान्न तु भिन्नानां यच्चकासत्यभिन्नवत्।। इति।**

वार्तिककारैरपि-

**अतो नुभव एवैको विषयोऽज्ञातलक्षणः।**

**अक्षादीनां स्वतः सिद्धौ यत्र तेषां प्रमाणता।।**[11]

इत्यत्र प्रमाणानां समेषामनुभवः सदात्मा एव विषय इति वर्णयद्भिः सद्रूपं सामान्यमेव सर्वशब्दानां प्रवृत्तिनिमित्तमिति सूचितम्।

सद्रूपसामान्यस्य च कल्पनास्पदत्वाभावात् **"सामान्यस्य काल्पनिकत्वान्न परस्पराश्रयदोषः"** इति बौद्धैर्वक्तुं न शक्यते। सद्रूपसामान्यस्य विधिरूपता दुवरिति नापोहः शब्दार्थ इति सिद्धम्। वेदान्तिनां मते सद्रूपं ब्रह्मैव सर्वशब्दानां प्रवृत्तिनिमित्तं तच्च भावरूपमिति नान्यापोहः शब्दार्थ इति निर्गलितार्थः जानका ग्रन्थान्तरेषूक्ता अपोहवादनिराकरणे सरणयः काश्चन प्रतिपाद्यन्ते इदानीं शब्दादुपजायमाना बुद्धिः "गौः" इत्येवं स्वरूपेणोत्पद्यते, न तु **"अगौर्न भवति"** इति किं च अपोहो नाम व्यावृत्तिरभाव इष्यते। न चाभावः स्वतन्त्रतया घटवदवगम्यते, अपोह एव शब्दार्थश्चेत् अगौर्न भवतीत्येवं बोधः स्यान्न तु गौरिति। तदयमन्याश्रितो वक्तव्य, कश्च तस्याश्रय इति चिन्त्यम्, न तावद् गोः स्वलक्षणमाश्रयः तस्य बौद्धमते विकल्पभूमित्वाभावात्। नाप्यवान्तरसामान्यं शाबलेयत्वादि तदाश्रयः तथा सति शाबलेयत्वं किमिति निर्वचनीयम्, तद्यदि साामान्यरूपं तदापोहवादेन किं कृत्यम्, गोत्वमपि तथैव विधिरूपं भवतु। यदि तदपि अपोहरूपं चेत् कस्तस्याश्रय इति पुनः पूर्वोक्तैव चिन्तावतरति।

बौद्धाः एतदूषणपरिजिहीर्षया शाबलेयादिस्वलक्षणसमुदायमगोव्यावृत्तेराश्रयं ब्रूयुः सोऽप्यघटमान एव समुदायिव्यतिरेकेण तस्यानुपलम्भात्। समुदायिनां च स्वलक्षणानां देशकालादिभेदेनानन्त्याद्वर्गीकरणं पुरुषायुषश्शतेनापि न शक्यक्रियमिति समुदायोऽपि न तदाश्रयः। तस्मात् सर्वसाधारणं प्रतिपिण्डं परिसमाप्तं किमपि नूतनमगोव्यावृत्तेरधिकरणं स्वीकार्यम्, तच्च गोत्वमेवेति तस्मिन्नङ्गीकृते च किमगोव्यावृत्तिकल्पनाऽऽयासेन कृत्यम्। तदुक्तं भट्टचार्यैः-

**तस्मात् सर्वेषु यद्रूपं प्रत्येकं परिनिष्ठितम्।**

**गोबुद्धिस्तन्निमित्ता स्याद् गोत्वादन्यच्च नास्ति तत् ।। इति ।।**[12]

अपि च तन्मते अश्वादयश्च विधिरूपतया न गृह्यन्ते किन्त्वन्यव्यवच्छेदेनैवेति तेषामपि व्यवच्छेदग्रहणे सैव वार्तेति नेदानीं विकल्पैः क्वचिदपोहो विषयीकर्तुं शक्यते, निर्विकल्पेन न कश्चिद् व्यवहार इति सकललोकयात्रोत्सादप्रसङ्गः। किंच तन्मते ये एते शाबलेयादिशब्दाः ते सर्वे अपोहवाचित्वाविशेषात् पर्यायाः स्युः। अपोहभेदाददोष इति चेन्न, अपोहानां भेदाभावात्, भिद्यमानत्वे वा स्वलक्षणवदेषां वस्तुत्वप्रसक्तिः। कर्कादिशाबलेयाद्याधार भेदादपोहभेद इति चेन्न, तेषामाधारत्वस्य निरस्तत्वात्, आधारभेदेन वा तद्भेदाभ्युपगमे प्रतिस्वलक्षणमपोहभेदप्रसङ्गः, ततश्च सामान्यात्मतापोहस्य हीयेत।

अथापोह्यभेदेनापोह भेदमवधार्य पर्यायिता पराणुद्यते, तदप्यसारम्, भवन्नपोहिभेदाद् भेदो न पर्यायत्वमपहन्ति भाक्तो ह्यसौ न मुख्यः। न चापोऽह्यभेदाद् भेदोऽपोहस्यावकल्पते, यो हि सम्भाव्यमानसंसर्गेराधारैरपि न भेत्तुं पार्यते स दूरवर्तिभिरलब्धसम्बन्धैरतिबाद्यैः कथं भिद्यते । यदि कथंचित् बौद्धैरपोह्यभेदाद-पोहभिन्नत्वमिष्यते तर्हि अपोहौक्यात् तदैक्यं कुतो नेष्यते। भवितव्यं चापोहौक्यादपोहैक्यम्। तथाहि - गवाश्वयोरन्यापोहेन व्यवस्थाप्यमानयोरगाव; अनश्वाश्च हस्त्यादयोऽपोह्यास्तुल्या भूयांसो वा भवन्ति। असाधारणस्तु एको गौरश्वे गवि चाश्वोऽतिरिच्यते। तत्रैवं अपोह्यभेदाद् गवाश्वयोर्भेदो भवतु भूयसामपोह्यानामभेदाद् गवाश्वयोरभेदो वा भवतु इति विचारणायां "विप्रतिषिद्धधर्माणां समवाये भूयसां स्यात् सधर्मत्वम्" इति न्यायेनाभेद एव न्याय्यो भवेत् । तदुक्तम्-

**अगव्यश्वातिरेकः स्यादश्वश्च गवाधिकः।**

**शेषं हस्त्याद्यपोह्यन्तु द्वयोरपि न भिद्यते।।**[13]

तत्रैकभेदाद् भेदोऽस्तु बह्वभेदादभिन्नता भूयसां स्यात् सधर्मत्वमित्यभेदः प्रसज्यते॥ इति। अपि च अश्वादयो गोशब्देन सामान्यरूपेण वापोह्येरन् विशेषात्मना वा? न चरमः विशेषात्मनापोह्यन्ते चेदपसिद्धान्तप्रसङ्गः तदनङ्गीकृतत्वाशब्दवाच्यत्वाच्च। नाद्यः सामान्यात्मना तु तेषामप्यपोहरूपत्वादभा-वत्वम्। कथं चाभावस्यैवाभावः क्रियते ? करणे वा प्रतिषेधद्वययोगाद् विधिर-वतिष्ठत इति विधिरूपः शब्दार्थः स्यात्।

किं च अपोह्यात्मनश्च तुरगादेयोंऽ पोहः (गवेतरापोह इत्यत्र) स तस्माद्विलक्षणः, अन्यथा वा? वैलक्षण्ये तस्य भावात्मना भवेत्, अभावस्य वैलक्षण्यादिधर्माधारत्वानुपपत्तेः। अन्यथा चेत् अवैलक्षण्यादपोह्ययोः यादृश एवापोह्यः तादृश एव तदपोह इति गौरप्यगौः स्यात्। अपि चापोहशब्दार्थपक्षे नीलमुत्पलमित्यादौ विशेषणविशेष्यभावसामानाधिकरण्यादिव्यवहारा विलुप्येरन्। न ह्येकस्मिन्नर्थे द्वयोरपोहयोवृत्तिरुपपद्यते, न चैकः कश्चिदर्थोऽस्ति यत्र तयोवृत्तिः स्यात्, स्वलक्षणस्याशब्दार्थत्वादन्यस्य चासम्भवात्।

किञ्च सज् ज्ञेयादिशब्दानामपोहनिरूपणासम्भवान् नापोहवाचित्वम्। न ह्यसदज्ञेयं किंचिदवगतं यद् व्यवच्छिद्यते। ज्ञातं चेत् सदेव तज् ज्ञेयं चेत्यतः कथं सच्छब्देन सदेव ज्ञेयशब्देन च ज्ञेयमेवापोह्यते, अज्ञातन्तु नितरामनपोह्यम्। कल्पिते असदज्ञेयं इति वक्तुं नैव शक्यते, कल्पनयैव सत्वाज् ज्ञेयत्वाच्च।

किं च अपोहस्यापि स्वशब्दप्रतिपाद्यत्वमनपोहापोहरूपेण वा, रूपान्तरेण वा? अन्त्येऽन्यापोहवाचकत्वनियमः शब्दानां विशीर्येत, अपोहशब्दे व्यभिचारात्। आद्येऽप्यनपोहस्यापोहतया अपोहः स्वशब्देनोच्यत इत्यत्रानपोहस्य स्वशब्दवाच्यत्वं रूपान्तरेण अपोहापोहरूपेण वेति चिन्त्यम्। यतः रूपान्तरेण चेत् शब्दानामपोहार्थत्वनियमभङ्गः। अपोहापोहरूपेण चेत् व्याघातः अनपोहप्रतिषेधो ऽप्यपोहः, अनपोहस्य चापोहतयापोह इति, न हि अनीलव्यावृत्तिमनीलात्मतया लौकिकाः समालोचयन्ति। तथा च अपोहवादिनामपोहशब्दार्थनिर्वचनं दुर्घटमेव। अपि च प्रतिषेधवादिनां नञादिशब्दानां का वार्ता अत्र न भवतीति नेति कोऽर्थः? उपसर्गनिपातानां च कथमपोहविषयत्वामाख्यातशब्दानां च पचतीत्यादीनामपोहो दुरुपपादः। नाम्नामेव जातिशब्दानामपोहविषयत्वमिष्यते येषां वैदिकमते जातिवाचित्वं तद्वद्वाचित्वं

वाभिप्रेतमिति चेत्, ततोऽन्येषां तर्हि का वार्ता, बाह्यार्थवाचित्वे जातिशब्देषु को द्वेषः निरालम्बनत्वे ज्ञानांशालम्बनत्वे किमपोहवादप्रमादेन। वा जातिशब्दानामपि तदेवास्तु एतदपि विचारणीयम्- किं शब्दोऽपोहस्य स्वतन्त्रतया गमक, लिङ्गतया वा? इति। नाद्यः बौद्धमते मानद्वैविध्यमेव स्वीकारात्। न द्वितीय; अपोहेन शब्दस्य तादात्म्यादिनिबन्धनः प्रतिबन्धः न सिद्ध्यतीति दर्शितत्वात्। अथाधूमव्यावृत्त्युपगृहीतानामनग्निव्यावृत्त्युपहितैः प्रतिबन्धावधारणमभिधीयते, तदपि न चारु, व्यावृत्तेरवस्तुतयोपसंग्राहकत्वानुपपत्तेः। उपसंग्राहकं तदुच्यते- यदुत भिन्नेष्वभिन्नकारणम्। अपोहस्य च सर्वोपाधिविनिर्मुक्तस्य कथं नामाभिन्नव्यवहारकारणतासम्भवः? एवं च शब्दोऽपोहस्य केन रूपेण गमक इति दुरुपपादः। तथा चापोहस्य शब्दार्थत्वेऽपि शब्दप्रमाणस्यानुमानेऽन्तर्भावो वक्तुं न शक्यत इति अपोहस्य शब्दार्थतासाधनप्रयासः शाक्यानां व्यर्थ एव।

**नवीनबौद्धानामपोहवादपरिष्कारः, तत्समीक्षा च-**

अपोहमात्रं न शब्दार्थः किन्तु अन्यापोहवानेव शब्दार्थ इति बौद्धमतम्। गोशब्दश्रवणसमनन्तरं गव्येव नियता प्रवृत्तिोंके दृश्यते न तु गजादौ। अतः गोशब्दः स्वेतरव्यावृत्तिं बोधयतीति स्वीकार्यमकामेनापि । न च गोशब्दान् न स्वेतरव्यावृत्तिर्गम्यत अपि तु गोशब्दाद् गोत्वस्य वा गोत्वविशिष्टस्य वा बोध; गोत्वस्य गव्यैव विद्यमानत्वाद् गोरेव तदभिव्यूजकत्वाद्वा तत्रैव नियतप्रवृत्तिः स्वेतरव्यावृत्तिस्तु न शब्दगम्या किन्तु आर्थिकी। यतः अनन्यलभ्यः शब्दार्थः। तदुक्तमाचार्यसुरेश्वरैः-

**प्रतिपाद्य पदार्थं हि विरोधात् तद्विरोधिनः।**
**पश्चादभावं जानाति वध्यघातकवत् पदात् ।। इति ।।**
**मानान्तरादपोहस्तु न शाब्दस्तेन स स्मृतः ।। इति ।।**[14]

इति वाच्यम्। अतिरिक्तगोत्वस्वीकारः, तस्य गव्येव विद्यमानत्वमित्यादिबहुकल्पनापेक्षया लाघवागोशब्दादेव स्वेतरव्यावृत्तस्वलक्षणबोधो जायते इति स्वीकरणमुचितम्। एवमपोहवतः शब्दार्थत्वे अभा वरूपस्यापोहस्याधारः कः वर्गीकरणं किं निमित्तमित्यादिदूषणानि दूरे एव स्युः। विज्ञानवादिनां बौद्धानां मते वस्तूनां स्वलक्षणमस्त्येवेति पूर्वसिद्धस्वलक्षणमादाय स्वेतरव्यावृत्तिः बोध्यत इति क्वान्योन्याश्रयदोषः। अपोहच द्विविधः प्रतिषेधः पर्युदासश्चेति। पर्युदासोऽपि पुनः द्विविधः बुद्ध्यात्मा, अर्थात्मा चेति। अतः प्रतिषेधवाचिनां नञादिशब्दानामप्यपोहवाचित्वं सुघटमेव। तदुक्तं शान्तरक्षितेन-

**अन्यापोहापरिज्ञानादेवमेते कुदृष्टयः।**
**स्वयं नष्टा दुरात्मानो नाशयन्ति परानपि।।**
**तथा हि द्विविधोऽपोहः पर्युदासनिषेधतः।**
**द्विविधः पर्युदासो पि बुद्धयात्मार्थात्मभेदतः ।। इति ।।**

अत्रोच्यते- अपोह्यापोहवादपरिष्कारेण पूर्वदर्शितेन कोऽपि लाभोन दृश्यते; दूषणान्तराणामस्मिन् परिष्कृतापोहवादे विद्यमानत्वात्। पूर्वोक्तपरिष्कृता-पोहवादोऽपि समालोचित एव मीमांसाकैर्नैयायिकैश्च। तथाहि अन्यापोहवानेव शब्दार्थ इत्यत्र अन्यापोहविशिष्टं किमिति विचार्यम्। यदि अन्यापोहविशिष्टस्वलक्षणमेव शब्दार्थस्तर्हि स्वलक्षणानामानन्त्यात् विशेषाणामनुक्तेषु तेषु सम्बन्धग्रहणासम्भवात्। यदि चापोहवत्वं सामान्यमेव शब्दार्थ इत्युच्यते। तदपि कल्प्यमानं वस्तुरूपमवस्तुरूपं वा? आद्ये जातिरेव सा स्यात्। अन्त्येऽपोहमात्राभिधानं तत् ततश्चावस्तुनोराधाराधेयादि-सम्बन्धाभावेन पपत्तेरयुक्तम्। तदुक्तम् -तच्चापोहान्तरं स्यात्, मिथो विशेषणविशेष्यत्वानु-

**नाधाराधेयवृत्त्यादिसम्बन्धश्चाप्यभावयोः ।॥ इति ।।**[15]

अन्यापोहविशिष्टं स्वलक्षणमिति पक्षे च अपोहस्वलक्षणयोः सम्बन्धानुपपतेः विशेषणविशेष्यभावानुपपत्तेश्च। यतः विशेष्यानुरक्तया बुध्यमानं विशेषणं भवति, न हि स्वलक्षणानुरक्ततयापोहबोधस्सम्भवति। यदि चापोहापोह्ययोः सम्बन्ध एवापोहवत्वमिष्यते तर्ह्यपसिद्धान्तापात, सामानाधिकरण्यानुपपत्या सम्बन्धस्य बौद्धैरेव निराकृतत्वात्।

अन्योन्याश्रयदोषोऽपि अपोहवादिनां दुष्परिहार्य एव। तथा हि- अगोव्यावृत्तिरेव अगोव्यावृत्तिवद् वा गोशब्दार्थ इति हि तन्मतम् । तत्रागोनिषेधेन गोसिद्धि; गोसिद्ध्या चागोनिषेधसिद्धिरिति परस्पराश्रयत्वम्। अथ अगोनिषेधेन गोसिद्धिः इति नाङ्गीक्रियते किन्तु गोशब्दान् नियतप्रवृत्तिर्गव्येव यद् दृश्यते तदुपपिपादयिषयैव अपोहवत्स्वलक्षणं गोशब्दार्थ इत्युररीक्रियत इत्यतो न परस्पराश्रयदोषलेश इति चेत्। सत्यम्, पक्षेऽस्मिन् परस्पराश्रयदोषः कथंचिन् न स्यात् तथापि पूर्वोक्तदूषणन्तु स्यादेव। किं चैवं बौद्धैः वक्तुं नैव शक्यत इति पूर्वोक्ता सरणिरेवाश्रयणीया तत्र चान्योन्याश्रयत्वं दुष्परिहार्यमिति मत्वान्योन्याश्रयदोषो दत्तः । किमर्थमेवं बौद्धैः वक्तुं नैव शक्यत इति चेद, उच्यते- शब्दादपोहविशिष्टं स्वलक्षणं प्रतिपद्यते इति वदद्भिः समानवित्तिवेद्यत्वात् शब्दात् स्वलक्षणमपि प्रतिपद्यत इति स्वीकृतं भवति, विशेषणविशेष्ययोर्बोधं विना विशिष्टबोधानुपपत्तेः। शब्दात् स्वलक्षणं गम्यते इति स्वीकृतं चेत् स्वमतहानिप्रसङ्गः, यतः तैरेव स्वमते प्रत्यपादि तत्र तत्र बहुवारम्-

**वस्तु स्वलक्षणं तावत् प्रत्यक्षेणैव मुद्रितम्।**
**ततोऽन्यदनुमानेन सम्बन्धापेक्षवृत्तिना ।। इति ।।**[16]

स्वलक्षणं प्रत्यक्षस्यैव विषय इति। मतमिदं परिष्क्रियते शब्दस्यापि स्वलक्षणं विषय इति चेत्, न प्रमणसम्प्लवापत्तेः । तदपि अस्तु इति चेत्, सत्यम्, तथा सति विवाहसमये कन्यायाः पित्रा निजगोत्रं पृष्टस्य यदेव भवतां गोत्रं तदेव ममापि गोत्रमिति वदतो वरस्य या स्थितिः सैवेत्थं बौद्धमतपरिष्कर्तृणामपि स्यात्। यतो जामातृश्वशुरयोरेकगोत्रत्वं विवाहानुपपत्तिवत् प्रमाणसम्प्लवाङ्गीकारे क्षणभङ्गवादस्य तद्वारा विज्ञानावादिबौद्धमतस्य च त्यागः प्रसज्यते।

अथ स्वलक्षणं प्रत्यक्षतो ज्ञायत इति वाच्यम् तदपि सर्वत्र न सङ्गच्छते। यत्र गोशब्दश्रवणसमनन्तरं देशान्तररस्थगोरेवानयने प्रवर्तते तत्र स्वलक्षणमपि शब्दवेद्यमिति स्वीकार्यमेव भवति। एतद्दोषवारणाय स्वेतरव्यावृत्तिमात्रं शब्दवेद्यमित्यङ्गीकारे च पूर्वोक्तरीत्या परस्पराश्रयदोषो दुष्परिहार्यः।

यत्तु कुमारिलोक्तदूषणापनिनीषया विकल्पप्रतिबिम्बकमारोपिताकारमात्रव्यावृत्तिच्छायोपरक्तं परिकल्पितं किमपि तदपि न

व्यवहारपदवीमवतरितुमुत्सहते- निराकृतमेतत् जयन्तभट्टैः। तदित्थम्-

**विकल्पो नाम बोधात्मा स च स्वच्छः स्वभावतः।**
**नासावितरसम्पर्कादृते कलुषतामियात्।**
**नूनमभ्युपगन्तव्यं किंचिदस्योपरञ्जकम् ।**
**आन्तरं वासनारूपं बाह्यं वा विषयात्मकम् ।।**
**यत्पुनर्विद्यते नान्तर्न बहिस्तेन रज्यते ।**
**विज्ञानमिति मायैषा महती धूर्तनिर्मिता ।।**
**विषया एव बुद्धीनामाञ्जस्येनोपरञ्जकाः ।**
**वासना विषयज्ञानजन्यत्वान्न तथोदिताः ।।**[17]

शब्दजन्यव्यवहारोपपादनाय शब्दगम्यविकल्पस्यापि किंचिदुपरंजकं वक्तव्यम्। तद्यदि बाह्यं कुमारिलोक्तदूषणाशनिपातः। यदि तदान्तरं चेत्तेन विकल्पोपरागः कर्तुं न शक्यते। नान्तर्न बहिर्विद्यते विद्यते चेति कल्पनामात्रम्। तादृशानिर्वचनीयेन विकल्पानामनुरञ्जनस्योपपादयितुमशक्यत्वात्, अत्यन्तमसतश्च शशविषाणादेर्व्यवहारविषयत्वाभावात्। किंचिच्चेन् नूनमन्तर्वा बहिर्वा भवितव्यम्, तथा च पूर्वोक्तदोषापत्तिः। तस्मात् विचित्रापोहकल्पनापेक्षया प्रत्यक्षाद्यथाविधिरूपार्थबोधस्तथैव शब्दलिङ्गाभ्यामपि विधिरूपार्थस्य बोधो जायत इति स्वीकरणमेवोचितम् ।

**पाद टिप्पणी**

1 प्रमाणवार्तिकम्

2 प्रमाणवार्तिकम्। ७६८ श्लोक सं.

3 श्लोकवार्तिकम् (अपोहवादनिरासप्रकरणम्) पृ.४१५.

4 नीलो घटः पीतो घटः इत्यत्र घटः, घटः इत्यनुगतप्रतीतिबलादेव सामान्यसिद्धिर्वक्तव्या। यदि तत्रापि एकमेव वस्तु भासते न तदतिरिक्तमिति स्वीक्रियते तदा सामान्यसिद्धिः कथं भवेदिति भावः। अत्र बौद्धमते सामान्येऽपहनूयमाने गौर्गौरिति शाबलेयादिषु योऽयमनुवृत्तः प्रत्ययः स कथं समर्थ्यत इति प्रश्नः संजायते। तस्योत्तरं बौद्धैर्दत्तमेवम् । तदुक्तम्- विकल्पविषये वृत्तिरिष्टा शब्दानुमानयोः। अतस्तद्विषयाश्चैते विकल्पा इति वर्णितम् । इति॥ न्या. मं. पृ. २७६

विकल्पमात्रमेव सामान्यप्रत्ययः, विकल्पाश्च नार्थधीजन्मानः। विकल्पश्च शब्दज्ञानानुपाती वस्तुशून्यो विकल्प इति योगसूत्रोक्त असत्प्रत्यय एवात्र विवक्षित। यथा सामान्येष्वनुगतविकल्पः औपाधिक इति न्यायमते स्वीकृतम् तथा बौद्धमतेऽपि एकार्थक्रियाकारित्वमुपाधिः, तेनैव गौर्गौरित्यनुगतप्रतीतिः समर्थ्यत इति न दोषः। तदुक्तम् - यदेव वादोहादि कार्यमेकेन जन्यते। गोपिण्डेन तदेवान्यैरिति तेष्वनुवृत्तधीः ॥ इति (न्या. म. पृ. २७७)

१. तदुक्तं न्यायमंजर्याम्- सर्वसर्वगता वा स्यात्पिण्डसर्वगतापि वा । सर्वसर्वगतत्वे स्यात्कर्कादावपि गोमतिः॥ अश्वधीः शाबलेयादावुष्ट्रबुद्धिर्गजादिषु।पदार्थसङ्करश्चैवमत्यन्ताय प्रसज्यते॥न्या.म.पृ.२७३

5 प्रमाणवार्तिकम्, ३.१५१,५२,५३

6 न्याय.म.पृ.२८०

7 न्या.मं.पृ.२८२

8 न्या.मं.पृ.२८२

9 न्या.मं.पृ.२८२

10 ब्रह्मसिद्धिः २.३१

11 बृहदारण्यवार्तिकम् पृ. १८७

12 श्लोकवार्तिकम्, १.१.५

13 श्लोकवार्तिकम्, पृ.१६२

14 सुरेश्वरवार्तिव. तैत्तिरीयोपनिषद् ब्रह्मवल्ली १.६९.

15 श्लोकवार्तिकम्,पृ.४१६

16 न्याय.मं.पृ.२८.

17 न्याय.मं.पृ.२८२